International Journal of Sanskrit Research 2020; 6(1): 07-10

International Journal of Sanskrit Research
अनन्ता

ISSN: 2394-7519
IJSR 2020; 6(1): 07-10
© 2020 IJSR
www.anantaajournal.com
Received: 07-11-2019
Accepted: 09-12-2019

**तरणीकुमारपण्ड़ा**
शोधच्छात्र, संस्कृत-पालि-प्राकृतविभाग, विश्वभारती, शान्तिनिकेतनम्, पश्चिम बंगाल, भारत

# ब्रह्माण्डपुराणे मोक्षस्य अवधारणा

## तरणीकुमारपण्ड़ा

**सारांश:**
पुराणानि भारतीयसंस्कृतासाहित्यस्य प्राणभूतानि भवन्ति। भारतीय-सभ्यताचार-विचाराणां जनतायां येन साहित्येन प्रचारं कृतं, तत्तु पौराणिकं साहित्यम् एव। भारतीयसंस्कृते: धारकं वाहकञ्च भवति पुराणसाहित्यम्। अभिजात-आर्यचैतन्यस्य उत्समुखात् पुराणस्य कथासरितं प्रवाहितं भवति। यथा वैददिकधर्मस्य स्वरूपं ज्ञातुं वेदस्यास्ति अपेक्षा तथा धर्मशास्त्रस्य आवश्यकता विद्यते तथैव भारतस्यास्यतीतज्ञानाय अत्युपयोगिनां पुराणानां पर्यालोचनम् अनविार्यं वर्तते। वस्तुतस्तु भारतीयसंस्कृते: भव्यं रूपम् अस्मिन् साहित्ये चतुरस्रतया प्रफुल्लतां गतम् अवलोक्यते। भारतीयजनतासु धार्मिकविधानाय, सांस्कृतिककृत्याय, सामाजिकोपकाराय, आध्यात्मिकज्ञानाय च पुराणेभ्य:पर्याप्ता प्रेरणा प्राप्यते। तस्मात् पुराणसाहित्यं हि भारतस्यास्ति अमूल्यो निधि:।उच्यते- "**पुरा नवं भवति इति पुराणम्।**" संसारारण्येऽस्मिन् बंभ्रम्यमाणानां जीवानां कृते पुराणम् अस्ति सरल: आलोकमार्ग:। परमतत्वदृष्ट्या पुराणं हि अवश्यमेव मोक्षशास्त्रम्। अष्टादश पुराणेषु ब्रह्माण्डपुराणस्य एकं विशिष्टस्थानम् अस्ति। मोक्षप्रदायके,सर्वपापहरे अस्मिन् राजसिकपुराणे जीवस्य परमकाम्ये मुक्तिविषये विविधसरलमार्गस्य वार्ता उद्घोष्यते। धर्मादिषु चतुर्बिधपुरुषार्थेषु मोक्ष:हि परम: पुरुषार्थ:। मोक्षशब्दस्य पर्यायवाचकशब्द: भवति मुक्ति:। का भवति मुक्ते: संज्ञा? उच्यते यदा जीव: भोगासक्तिसम्पन्नं जड़देहं त्यत्त्त्वा आत्मस्वरूपं जानाति तदा तस्य मुक्तिर्भवति। भागवतपुराणे उल्लिखितम् अस्ति- "**मुक्तिर्हित्वाऽन्यथारूपं स्वरूपेण व्यवस्थिति:।**" (२/१०/६) वस्तुतस्तु जीव: अविद्यावशात् करोति तदर्थं स पुन: पुन: जन्ममरणचक्रम् याति आयाति च। संसारपाशेन आवद्ध: सन् जीव: बहुविधं दु:खं सहते। केवलं ब्रह्माण्डपुराणस्य निर्देशितमार्गेण तद्दु:खम् सुकरभावेन निराकृतं भवति अर्थात् जीव: मुक्तिभाक् भवति। तस्मात् अस्य पुराणस्य उपदेश: सर्वथा पालनीय:। अत्र तत्त्वज्ञान - योग- इन्द्रियसंयम- ध्यान -समत्वभाव- प्रणवमन्त्रज्ञान -अध्ययन-वंशचरितादिभि: जीवस्य मोक्षलाभविषयो वर्णित: भवति। अपि च तर्पण-देवप्रन्नताविधान- विप्रसेवा-तीर्थस्नान - व्रतानुष्ठान-उपदेशपालन -नारीसम्मानप्रदर्शन- स्मरणाादिभि: उपायै: रम्यभावेन मुक्ते: आलोचनं प्राप्यतेऽस्मिन् पुराणे। शोधसन्दर्भेऽस्मिन् स्वचिन्तनं मया उपस्थाप्यते ।

**मुख्यशब्दा**: उपोद्घात:-मुक्ते: संज्ञा- तत्त्वज्ञानेन मुक्ति:- योगेन मुक्ति:- इन्द्रियसंयमेन मुक्ति:- ध्यानेन मुक्ति: समत्वभावेन मुक्ति:- प्रणवमन्त्रज्ञानेन मुक्ति:-अध्ययेन मुक्ति:-वंशचरितेन मुक्ति:- उपसंहार

**प्रस्तावना**
भारतीयसंस्कृते: धारकं वाहकञ्च भवति पुराणसाहित्यम्। अभिजात-आर्यचैतन्यस्य उत्समुखात् पुराणस्य कथासरितं प्रवाहितं भवति। यथा वैददिकधर्मस्य स्वरूपं ज्ञातुं वेदस्यास्ति अपेक्षा तथा धर्मशास्त्रस्य आवश्यकता विद्यते तथैव भारतस्यास्यतीतज्ञानाय अत्युपयोगिनां पुराणानां पर्यालोचनम् अनविार्यं वर्तते।वस्तुतस्तु भारतीयसंस्कृते: भव्यं रूपम् अस्मिन् साहित्ये चतुरस्रतया प्रफुल्लतां गतम् अवलोक्यते। भारतीयजनतासु धार्मिकविधानाय, सांस्कृतिककृत्याय,

**Corresponding Author:**
**तरणीकुमारपण्ड़ा**
शोधच्छात्र, संस्कृत-पालि-प्राकृतविभाग, विश्वभारती, शान्तिनिकेतनम्, पश्चिम बंगाल, भारत

सामाजिकोपकाराय, आध्यात्मिकज्ञानाय च पुराणेभ्य:पर्याप्ता प्रेरणा प्राप्यते। तस्मात् पुराणसाहित्यं हि भारतस्यास्ति अमूल्यो निधि:। उच्यते- **"पुरा नवं भवति इति पुराणम्।"** संसारारण्येऽस्मिन् बंभ्रम्यमाणानां जीवानां कृते पुराणम् अस्ति सरल: आलोकमार्ग:। परमतत्वदृष्ट्या पुराणं हि अवश्यमेव मोक्षशास्त्रम्। अष्टादश पुराणेषु ब्रह्माण्डपुराणस्य एकं विशिष्टस्थानम् अस्ति। मोक्षप्रदायके,सर्वपापहरे अस्मिन् पुराणे जीवस्य परमकाम्ये मुक्तिविषये विविधसरलमार्गस्य वार्ता उद्घोष्यते। वस्तुतस्तु जीव: अविद्यावशात् करोति तदर्थं स पुन: पुन: जन्ममरणचक्रम् याति आयाति च। संसारपाशेन आवद्ध: सन् जीव: बहुविधं दु:खं सहते। केवलं ब्रह्माण्डपुराणस्य निर्देशितमार्गेण तद्दु:खम् सुकरभावेन निराकृतं भवति अर्थात् जीव: मुक्तिभाक् भवति। तस्मात् अस्य पुराणस्य उपदेश: सर्वथा पालनीय:। अत्र तत्त्वज्ञान - योग- इन्द्रियसंयम- ध्यान -समत्वभाव- प्रणवमन्त्रज्ञान -अध्ययन-वंशचरितादिभि: जीवस्य मोक्षलाभविषयो वर्णित: भवति। अपि च तर्पण-देवप्रन्नताविधान- विप्रसेवा-तीर्थस्नान - व्रतानुष्ठान-उपदेशपालन -नारीसम्मानप्रदर्शन- स्मरणाादिभि: उपायै: रम्यभावेन मुक्ते: आलोचनं प्राप्यतेऽस्मिन् पुराणे । शोधसन्दर्भेऽस्मिन् स्वचिन्तनं मया उपस्थाप्यते ।

**मुक्ते: संज्ञा**

धर्मादिषु चतुर्बिधपुरुषार्थेषु मोक्ष:हि परम: पुरुषार्थ:। मोक्षशब्दस्य पर्यायवाचकशब्द: भवति मुक्ति:। का भवति मुक्ते: संज्ञा? उच्यते यदा जीव: भोगासक्तिसम्पन्नं जड़देहं त्यत्तत्वा आत्मस्वरूपं जानाति तदा तस्य मुक्तिर्भवति। भागवतपुराणे उल्लिखितम् अस्ति-

**"मुक्तिर्हित्वाऽन्यथारूपं स्वरूपेण व्यवस्थिति:।"** १

**अपि च निरालम्वउपनिषदि कथ्यते-**

**"नित्यानित्यवस्तुविचारादनित्यसंसारसमस्तसंङ्कल्पक्षयो मोक्ष:।"**

अर्थात् यदा वस्तुविचारेण नित्यं वस्तु निर्णितं भवति तदा अनित्यसंसारस्य समुदयसंकल्पस्य विनाशो भवति। सकलसंकल्पनाशात् जीवस्य मुक्तिर्भवति। पुराणे पञ्चविधा: मुक्तय:उल्लिखिता: सन्ति। ता: खलु यथा- सालोक्यमुक्ति, सामीप्यमुक्ति:, सायुज्यमुक्ति:,सार्ष्टिमुक्ति:, सात्मतामुक्तिश्च। ब्रह्माण्डपुराणे एतादृश्य: मुक्तय: परिलक्ष्यन्ते।

**तत्त्वज्ञानेन मुक्ति:-**

महापुराणस्यास्य चतुर्थे अध्याये हिरण्यगर्भस्य वर्णनं प्राप्यते। य: मानव: जन्मविवरणमिदं सम्यग्भावेन सम्पूर्णरूपेण च अवगच्छति, स भोगार्थी मनुष्य: आयुं कीर्तिं यश: पुत्रञ्च लभते। अपि च यदि कोऽपि मोक्षार्थी तज्ज्ञातुं समर्थो भवति, तस्य निश्चितरूपेण मुक्तिं लभते-

**निवृत्तिकामोऽपि नर:शुद्धात्मा लभते गतिम्।**[२]

अत्र पूज्य: ऋषि:लोमहर्षण: समासन्न-सनातनकल्पस्य वाराहकल्पस्य चोभयकल्पस्य मध्यवस्थाया: वर्णयन् मुक्तिलत्त्वम् उपस्थापयति स्म। स्वेषां देहेन्द्रियाणां संयोजकै: तन्मात्रादिभि: सह मिलित: सन् सर्ववर्णाश्रमाणां पूज्यतम: तुल्यनिष्ठासम्पन्नश्च देव-पितृ-मुनि-मनु-मनुसहचर-मानवगणश्च समागते कल्पान्तकाले स्वेषां विपर्ययम् आशङ्कते स्म। तत: ब्रह्मण-क्षत्रिय-वैश्यादीनाञ्च उपास्य: देवगण: पूर्वमन्वन्तरागत: देवगण: एकत्र मिलित: सन् तै: सह औसुक्य-विषादार्थञ्च व्याकुलचित्ते मर्हलोकं गच्छति, तस्मात् जनलोकं गत्वा तत्र कियत्कालं तिष्ठति,तत: दशकृत्व:स्वर्लोकं गमनागमनाच्च अनन्तरं तपलोकेषु दशकल्पकालं यापयित्वा सत्यलोकं गच्छति। अनेन प्रकारेण सहस्रदेवयुगकालम् अतिवृत्य अनन्तकालाय ब्रह्मलोकं गच्छति। आधिपत्यं ऐश्वर्यम् अन्यत् रूपादिषु सर्बेषु विषयेषु ब्रह्मसादृश्यं प्राप्यते-

**एवं देवयुगानान्तु सहस्राणि परम्परात्।**
**गतानि ब्रह्मलोकं वै अपरावर्तिनीं गतिम्।**
**आधिपत्यं विना ते वै ऐश्वर्येण तु तत्संयमा:।**
**भवन्ति ब्रह्मणस्तुल्या रूपेण विषयेण च।।३**

ते तत्र ब्रह्मानन्दलाभं कृत्वा प्रीतिपूर्णे हृदये कियत्कालं अवस्थानाद् अनन्तरं ब्रह्मणा सार्धं विलीन: सन् मुक्तिं लभते। मुक्तिकालेऽपि तेषां जाग्रतमानववत् स्वरूप-ज्ञानस्य उत्पत्तिर्भवति। तेषां भेदज्ञानं सम्पूर्णभावेन निराकृतं भवति, यदर्थं तेषां कार्यं कारणमपि विनश्यति। तदा ते नानातत्त्वदर्शिषु ब्रह्मलोकवासिषु शुद्धात्मा, सिद्ध: निरञ्जन:कारणातीतश्च सन् पुरुष इति प्रसिद्धो भवति। सृष्टिकाले निर्वापित-तेजस: इव तादृशानाम् अपवर्गभागिनां अपुन:पथवर्तिणां तत्त्वदर्शिणाम् अपि न पुमर्जायन्ते-

**अत्रापवर्गिणां तेषामपुनर्मार्गगामिनाम्।**
**अभाव: पुनरुत्पत्तौ शान्तानाच्चिर्षामिव।।४**

**योगेन मुक्ति:-** पुराणेऽस्मिन् योग: मोक्षस्य उपायरूपेण वर्ण्यते।मोक्षार्थी प्राणायामेन परमलक्ष्यं प्राप्तुं शक्नोति। अत्रापि उच्यते यद् प्राणायामेन दोषराशिं, धारणाभि: पापानि,प्रत्याहारेण विषयासक्तिं, ध्यानेन अनीश्वर-गुणनिचयं विनश्यति। तसमात्

योगिजन: एव नियमितरूपेण प्राणायामस्य अवलम्वनं कुर्यात्। अनेन कर्मणा सर्वपापेभ्य: परिशुद्ध: सन् क्रमश: परब्रह्मणि लीनं भवति-

**तस्मात् युक्त: सदा योगी प्राणायामपरो भवेत्।**
**सर्व्वपापी विशुद्धात्मा परं ब्रह्मधिगच्छति।।[५]**

अप्रतिघाति-ऐश्वर्ययुक्त-योगप्राप्ते सति सुक्ष्मपरमपदस्वरूपं मोक्षं प्राप्यते-

**ऐश्वर्यमप्रतिघाति प्राप्य योगमनुत्तमम्।**
**अपवर्गं ततो गच्छेत् ससूक्ष्मं परमं पदम्।।[६]**

**इन्द्रियसंयमेन मुक्ति:-** इन्द्रियसंयमी मानव: यदि स्वकीयां वासनां सम्पूर्णरूपेण नियन्त्रणं कुर्यात् तर्हि तस्य भगद्दर्शनम् अवश्यमेव भविष्यति। कूर्मावयवसंकोचनवत् यो मानव: कामं संयम्य परमात्मनि रति: संस्थापयितुं समर्थो भवति, स मानव:हि आत्मासाक्षात्कारं कर्तुं समर्थो भवति। ब्रह्माण्डपुराणे उल्लिखितमस्ति-

**यस्तु प्रत्याहरेत् कामान् कूर्म्मोऽङ्गानीव सर्व्वत:।**
**तथात्मरतिरेकस्थ: पश्यत्यात्मानमात्मनि।।[७]**

**ध्यानेन मुक्ति:-**

मोक्ष: हि परमसुखम्। यत: अनेन कर्मणा मृत्युम् अतिक्राम्यते। तस्मात् यो मानव: ब्रह्मपरायण: सन् ध्यानालम्वनं करोति, मन्वन्तरशतैरपि तं न कोऽपि व्याप्तं कर्तुं शक्यते। यत: विश्वसंज्ञक-विश्वरूप-पाद-ग्रीवासम्पन्न-विश्वेश्वर-विश्वभावनस्य विश्वगन्ध-माल्य-अम्वरधारिण: दिव्यपुरुषस्य दर्शनं तस्य भवति। तस्य परमकृपया साधकस्य ईदृशीं गतिं जायते। स निरिन्द्रिय: रुक्मवर्ण: पुरुष: योगवलेन दृष्टं भवति। स हि परमपुरुष: चक्षोरगोचरीभूत:, लिङ्गहीन:,त्रिगुणमय:, निर्विकार: सन्नपि लिङ्गयुक्त:, निर्गुण:-चेतन:- नित्य:- सदैव सर्वगत:, पवित्र:, अचल: स्वप्रकाशश्च भवति। तं महान्तं परमपुरुषं युक्तिभि:दृश्यते। उच्यतेऽस्मिन् पुराणे-

**पश्यन्ति युत्त्या ह्यचलं प्रकाशम्।[८]**

य: योगी समाहित: ध्यानानुरक्त: जितेन्द्रियश्च सन् शुभाशुभं कर्मद्वयं त्यक्तुं शक्नोति, स देहत्यागात् परं नित्यधामं लभते, तं पुन: जन्म-मरणक्लेशं न सहते-

**अवस्थितो ध्यानरतिर्जितेन्द्रिय:**
**शुभाशुभे हित्य च कर्म्मणा उभे।**
**इदं शरीरं प्रविमुच्य धर्म्मतो**
**न जायते न म्रियते वा कदाचित्।।[९]**

**समत्वभावेन मुक्ति:-** य: मानव: विशुद्धचित्तस्य अधिकारी,यस्य लोष्ट्र-काञ्चनेषु समत्वं पश्यति, यश्च समाहित: चित्त: सन् सर्वभूतेषु समभावेन विचरति, स अवश्यमेव नित्यम् अव्ययं सज्जनोचितं परमं अक्षयपदं प्राप्नोति। स न कदापि पुन: पुन: जन्मयातनां सहते। तस्मात् मुमुक्षुजनस्य अवश्यमेव समत्वप्रदर्शनं कुर्यात्। ब्रह्माण्डपुराणे प्राप्यते-

**विशुद्धबुद्धि: समलोष्ट्रकाञ्चन:**
**समस्तभूतेषु चरन् समाहित:।**
**स्थानं ध्रुवं शाश्वतमव्ययं सतां**
**परं स गत्वा न पुनर्हि जायते।।[१०]**

**प्रणवमन्त्रज्ञानेन मुक्ति:-** ॐ-कार: प्रणवाक्षर-ब्रह्मरूपेण निर्दिष्ट:। जीवस्य ईहायाम् अस्य अवस्थानं भवति। असौ ॐ-कार:ऋगादिवेदत्रयस्वरूप:, भूर्भुव: स्वर्लोकस्वरूप:अग्नित्रयस्वरूपश्च।इदमेव विष्णो:क्रमस्वरूपं वेदत्रयम्। परमार्थत: अस्य चतस्र: मात्रा: भवन्ति। य: योगिमानव:अस्मिन् कर्मणि नियुक्तं भवति, स निश्चितमेव तत्सालोक्यं लभते। अयं ॐ-कार:भुवनान्त-सर्वलोकानानां ब्रह्मपदस्वरूप:-

**मात्राश्चात्र चतस्रस्तु विज्ञेया: परमार्थत:।**
**तत्र युक्तश्च यो योगी तस्य सालोक्यतां व्रजेत्।।[११]**

य: ब्रह्मण: प्रत्यहं प्रणवस्य ध्यानं करोति, स पुन: पुन: संसारं न गमनागमनं करोति। अयं परब्रह्मसंज्ञित: ॐ-कार: यो मानव: अध्ययनं करोति उत अध्यापयति, स निश्चितमेव विमुक्तवन्धन: सन् संसारचक्रम् अतिक्रम्य अचलं निर्गुणं मङ्गलमयं धामं प्राप्नोति-

**इत्येतदक्षरं ब्रह्मपरमोङ्कारसंज्ञितम्।**
**यस्तु वेदयते सम्यक् तथा ध्यायति वा पुन:।।**
**संसारचत्मुत्सृज्य मुक्तवन्धनवन्धन:।**
**अचलं निर्गुणं स्थानं शिवं प्राप्नोत्यसंशय:।।[१२]**

**अध्ययनेन मुक्ति:-** जीवस्य अपरमेकं सुकरमार्गं भवति अध्ययनम्। अध्ययनेन तत्त्वज्ञानं लभते। बस्तुतस्तु जीव: भक्तिपूर्वकं यदि अध्ययनं करोति, तर्हि तस्य परमपदस्य समर्थो भवति। पुराणेऽस्मिन् उच्यते, य: मानव: यतिरहस्यं यथाक्रमेण अध्ययनं ध्यानञ्च करोति, स परमपदं लभते।१३

**स्वरूपज्ञानेन मुक्ति:-** वामदेवस्य गायत्रिमातु: रुद्राण्या: स्वरूपं च अवगते सति रुद्रलोकं प्राप्यते। अस्मात् लोकात् जीव:कदापि संसारे न प्रत्यावर्त्तते।१४ य: मानव: नाम्ना विग्रहभेदेन च सह महादेवस्य स्वरूपं विज्ञाने समर्थो भवति, स पुण्यात्मा पुत्रवान् सन् अन्तिमे ईश्वरसायुज्यं लभते। मुक्तिरियं सायुज्यमुक्ति: कथ्यते। तस्मात् महादेवस्य स्वरूपं अवश्यमेव मुमुक्षुजनस्य ज्ञातव्यम्। अस्मिन् पुराणे उल्लिखितम् अस्ति-

**एवं यो वेद तं देवं तनुभिर्नामभि:सह।**
**प्रजावानेति सायुज्यमीश्वरस्य नरो हि स:।।**[१५]

**वंशचरितेन मुक्ति:-**

अस्मिन् पुराणे इक्ष्वाकु-भोजादीनां वंशचरितं प्राप्यते। एतानि पूतचरितानि मुमुक्षुजनस्य अवश्यमेव ज्ञातव्यानि। य: मानव: इक्ष्वाकु-भोजादीनां नृपाणां पञ्चवंशानां वृत्तान्तं धारयति, शृणोति च,तस्य निश्चितमेव ब्रह्मलोकप्राप्तिर्भवति-

**धारणच्छ्रवणाच्चैव पञ्चवंशस्य धीमताम्।**
**तथोक्ता लौकिकाश्चैव ब्रह्मलोकं व्रजन्ति वै।।**[१६]

उपसंहार:-

परिशेषे उच्यते यत् पुराणानि भारतीयसंस्कृतासाहित्यस्य प्राणभूतानि भवन्ति।भारतीय-सभ्यताचार-विचाराणां जनतायां येन साहित्येन प्रचारं कृतं, तत्तु पौराणिकं साहित्यम् एव। साहित्येऽस्मिन् वेद-विहितानां धर्माणां सुखबोध्यभाषायां वर्णनं प्राप्यते। तस्मात् धार्मिकदृष्ट्या पुराणानामस्ति अधिकं महत्त्वम्। मुक्तिकामी मानव: यस्यामृतं विन्दुमात्रं पीत्वा मुक्तिपदम् अलंकरोति, तद् भवति वाक्यसुधा-धारासारस्वरूपं ब्रह्माण्डपुराणम्। पुराणमिदं सुवृहत् प्रक्षेपविहीनं स्वस्वरूपे सुरक्षितं च राजसिककपुराणम् भवति। अस्य महापुराणसस्य पुण्योदकेन सिक्त: सन् मुक्तिकामी मानव: सुदुलर्भं मोक्षपदं प्राप्तुं शक्यते। अत्र तत्त्वज्ञान - योग- इन्द्रियसंयम- ध्यान - समत्वभाव- प्रणवमन्त्रज्ञान -अध्ययन-वंशचरितादिभि: जीवस्य मोक्षलाभविषयो वर्णित: भवति। अपि च तीर्थस्नान-व्रतानुष्ठान-उपदेशपालन -स्मरण-अर्चन -नामसंकीत्तन-साधुसङ्गम-तर्पण-देवप्रन्नताविधान-विप्रसेवादिभि: उपायै: रम्यभावेन मुक्ते: आलोचनं प्राप्यतेऽस्मिन् पुराणे। मुमुक्षुमानवं निकषा एते उपाया: अनुकरणीया:। अत: जीव: मोक्षप्रदायकस्य पद्मपुराणस्य समीपे अधमर्ण: वर्तते इत्यत्र नास्ति संशय:। मुक्तिविषयकम् आलोचनमिदं दिग्विस्मृत-मुमुक्षुजनस्य सकाशे उज्ज्वलवर्त्तिकास्वरूपम्।

**तथ्यसूत्राणि**

१.भागवतपुराणम् (२/१०/६)
२. ब्रह्माण्डपुराणम् (४/८८)
३. ब्रह्माण्डपुराणम् (७/२९,३०)
४. ब्रह्माण्डपुराणम् (७/३९)
५. ब्रह्माण्डपुराणम्(१०/९१)
६.ब्रह्माण्डपुराणम् (१२/२५)
७. ब्रह्माण्डपुराणम् (१०/११०)
८. ब्रह्माण्डपुराणम् (१३/८)
९. ब्रह्माण्डपुराणम् (१६/७)
१०. ब्रह्माण्डपुराणम् (१७/२२)
११. ब्रह्माण्डपुराणम् (१९/७)
१२. ब्रह्माण्डपुराणम् (१९/२९,३०)
१३. ब्रह्माण्डपुराणम् (१९/४०)
१४. ब्रह्माण्डपुराणम् (२३/११)
१५.ब्रह्माण्डपुराणम्(२८/६०)
१६.ब्रह्माण्डपुराणम् (३२/५५)

**ग्रन्थसन्दर्भा**

1. उपाध्याय,वलदेव,पुराणविमर्ष,चौखाम्वाप्रकाशन,वाराणसी:१८९७ (तृतीय संस्करण), मुद्रित।
2. कूर्मपुराण, सम्पा.पञ्चानन तर्करत्न, नवभारत पावलिशार्स, कलकाता: १४२१, मुद्रित। वसु, गिरीन्द्रशेखर, पुराण प्रवेश, विवेकानन्द वुक सेन्टार,कलकाता:२०१२मुद्रित।
3. ब्रह्माण्डपुराण, सम्पा. पञ्चानन तर्करत्न, नवभारत पावलिशार्स, कलकाता: १४२१, मुद्रित।
4. मार्कण्डेयपुराण, सम्पा. पञ्चानन तर्करत्न, नवभारत पावलिशार्स, कलकाता: १४२१, मुद्रित।
   लिङ्गपुराण, सम्पा. पञ्चानन तर्करत्न, नवभारत पावलिशार्स, कलकाता: १४२१,मुद्रित।
5. शास्त्री, माधवाचार्य, पुराण दिग्दर्शन, माधवापुस्तकालय, दिल्ली:१९५८ ख्रीष्टाब्द मुद्रित।
6. Bhattacharya, Srimohan and Bhattacharya, Dinesh Chandra, Bharatiya Darsana Kosa (Vedanta), Calcutta: (Kolkata), Sanskrit College, (Vol.3, Part 1, 1981) (Calcutta Sanskrit College Reserch Series No.121) (Vol.3 Part 2, 1983) (Calcutta Sanskrit College Reserch Series No.124), print. Banerji, Sures Chandra, ACompanion to Sanskrit Literature, MLBD, Delhi: 1989 (2nd ed.), print Williams, M., Monier, A Dictionary English and Sanskrit, Motilal Baranasidas Publishers Private Limited, Delhi: 2012 (Reprint), print. Kolkata: 1954 (1st ed.), print.